# First mantra of each Veda

# चतुर्वेदाद्यमन्त्राः

## Document Information

Text title : chaturvedAdyamantrAH

File name : chaturvedAdyamantrAH.itx

Category : veda, svara

Location : doc_veda

Description/comments : First Richa/mantra from each of the four vedas.

Latest update : February 6, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 6, 2022

*sanskritdocuments.org*

# चतुर्वेदाद्यमन्त्राः

॥ ॐ ॥

ऋग्वेदः -

(ऋषिः - मधुच्छन्दाः, देवता - अग्निः, छन्दः - गायत्रीः, स्वरः - षड्जः)

ॐ । अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ १.००१.०१

यजुर्वेदः -

(प्रथमोऽध्यायः, ऋषिः - परमेष्ठी प्रजापतिः, देवता - सविता,
छन्दः - स्वराड्बृहती ब्राह्म्युष्णिक्, स्वरः मध्यमः, ऋषभः)

ॐ । इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु
श्रेष्ठतमाय कर्मण आ प्यायध्व मघ्न्या इन्द्राय
भागं प्रजावतीरनमीवा अयक्ष्मा मा व स्तेन ईशत
माघशꣳसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य
पशून् पाहि ॥१॥

सामवेदः -

(आग्नेयं काण्डम्, प्रथमोऽध्यायः, प्रथमप्रपाठकस्य प्रथमोऽर्धः,
प्रथमा दशतिः, ऋषिः - भरद्वाजो बार्हस्पत्यः, देवता - अग्निः,
छन्दः - गायत्रीः, स्वरः - षड्जः)

अग्न आ याहि वीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि ॥ १

अथर्ववेदः -

(प्रथमं काण्डम्, मेधाजनन सूक्तम् ।
ऋषिः - अथर्वा, देवता - वाचस्पति, छन्दः - अनुष्टुप्)

ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे ॥ १.१.१॥

1.6.1 is given here for reference, as in some prints.
(अथर्ववेदः, प्रथमं काण्डम्, अपांभेषज (जलचिकित्सा) सूक्तम्,
ऋषिः - सिन्धुद्वीप, कृति अथवा अथर्वा,
देवता - अपांनपात्, सोम, आपः, छन्दः - गायत्रीः)
शं नो देवीरभिष्टय आपो भवन्तु पीतये ।
शं योरभि स्रवन्तु नः ॥ १.६.१॥

The first Richa or mantra from each Veda.

*First mantra of each Veda*
pdf was typeset on February 6, 2022

Please send corrections to *sanskrit@cheerful.com*